SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 03
June 2025, Price Rs.20/-
No. of pages-24

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

जून् - २०२५ रू.२०/-



तिरुपतिस्थ

## श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवः

02.06.2025 तः 10.06.2025 पर्यन्तम्

**06.04.2025 तिथ्यारभ्य 14.04.2025 पर्यन्तं ओण्टिमिट्ट श्रीकोदण्डरामस्वामिनः ब्रह्मोत्सवाः अत्यन्त वैभवोपेततया ति.ति.देवस्थानद्वारा निर्वाहिताः। अस्मिन् सन्दर्भे श्रीसीतारामकल्याणमहोत्सवे आन्ध्रप्रदेश प्रभुत्वपक्षतः आन्ध्रप्रदेश राष्ट्रमुख्यमन्त्रिणः माननीयाः श्री यन्.चन्द्रबाबुनायुडु महोदयाः पवित्रपीताम्बरं सीतारामयोः समर्पितवन्तः।**















# गीतामृतम्



श्रीभगवानुवाच -

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिः तदा योगमवाप्स्यसि।।

स्थितप्रज्ञस्य काभाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभासेत किमासीत व्रजेत किम्।।

(भगवद्गीता २.५३-५४)

हे अर्जुन! नानाविधार्थवाद श्रवणात् इतः पूर्वं प्राप्तविक्षेपा ते बुद्धिः, यदा परमात्मध्याने निश्चला स्थिरास्यात् तदा त्वं परमार्थज्ञानं प्राप्स्यसि।

विशेषांशः - विषयवासनायाः अनाशे सत्यस्य ज्ञानं न स्यात्। समाधौ निश्चलताकारक फलविषयकमहत्त्वप्रतिपादकशास्त्रेषु भ्रान्तिरवश्यं नाशयितव्या इति सारांशः।

हे कृष्ण! ब्रह्मसाक्षात्कारज्ञानवतः समाहितचित्तस्य लक्षणं किम्। तादृशदृढज्ञानवान् किमुपदेक्ष्यति। तादृशात्मवेत्ता कथं स्यात्। तस्य आचारणं कथं स्यात् इत्युर्जुनप्रश्नः।

विशेषांशः - ब्रह्मवेत्तृः लक्षणं किं? सः लोकाय कीदृशं धर्ममुपदेक्ष्यति। तस्य आश्रमःकथं स्यात् तस्य प्रवर्तनं कथं स्थादिति अर्जुनप्रश्नाः प्रतिमुमुक्षुणा एते चत्वारः धर्माः ज्ञातव्याः आचरणीयाः। स्तितप्रज्ञः इति प्रसन्नः इति योगसमाधिस्थः इति, प्रज्ञानं ब्रह्म इत्यनुभवविशिष्टः इति जीवन्मुक्तः इति ब्रह्मवेत्तृः नामानि भवन्ति।

# सङ्कीर्तनम्



नमो नमो जगदेकनाथ तव सर्वेश
विमलविसृतलसद्विख्यातकीर्ते
रामरघुवर सित राजीवलोचन
भूमिजारमण त्रिभुवन विजय
कोमलाङ्गश्याम कोविदरणरङ्ग
भीमविक्रमसत्यविरुदप्रवीण।
दलितदैतेयकोदण्डदीक्षादक्ष
जलजाप्तकुल विभीषण रक्षक
कलितदशरथतनय कौसल्यानन्द
सुलभवानरमुख्यसुग्रीव वरद
चारुलक्ष्मणभरतशत्रुघ्न पूर्वज
तारकब्रह्मनित्यस्वरूप
धीरश्रीवेङ्कटाधिप भक्तवत्सल
भूरिगुण साकेतपुरनिवास।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम्)

सम्पादकीयम्

# योगः - आरोग्यमार्गः

अस्माकं पुराणशास्त्रेषु मुक्तिमार्गगामि योगशास्त्रमेकं जगत्प्रसिद्धम्। इदं योगशास्त्रं ऋ षीणां विज्ञानतपःफलजातसमस्तविश्वशान्तये आरोग्याय आत्मशुद्धये जगदुपकारकं मार्गदर्शकञ्च इति कथने नात्यतिशयोक्ति। योगः न केवलं शारीरकव्यायामः मनश्शुद्धये च अत्यन्तमुपकरोति। युजिर्योगे इति धातोस्त्पन्नोऽयं शब्दः। योग शास्त्रे योगः चित्तवृत्तिनिरोधकः इति प्रोक्तम्। भगवद्गीतायां योगः कर्मसु कौशलमिति प्रोक्तम्। योगे इतस्ततः धावन्मनः निरोधयति। सर्वेश्वरे भगवति मनः साधनात् स्थिरं करोति। क्रियमाणेषु कर्मसु नैपुण्यमित्युक्ते मनोव्यापारं भगवद्ध्याने स्थिरीकरणमेव। पतञ्जलिमहर्षिकृतयोगशास्त्रग्रन्थे योगमधिकृत्य १९५ सूत्राणिसन्ति। समग्रजीवनमार्गे योगः अवश्यं सर्वैराचरणीयः। दिव्यौषधमिदं सुदीर्घ जीवनाय। आधुनिककाले यान्त्रिकजीवनशैली मानसिकोद्वेग शारीरकासम्पूर्णादिनेपथ्ये योगाचरणप्रामुख्यं प्रवृद्धम्। योगे प्राणायामः, ध्यानाद्यष्टाङ्गयोगः मनसः स्थिरत्वं सम्पादयति। तिरुमलतिरुपतिदेवस्थानं योगशास्त्रविषयकग्रन्थं योगसर्वस्वम्, मातृश्रीतरिगोण्डवेंगमाम्बा विरचिताष्टाङ्गयोगसारः इति ग्रन्थौ मुद्राप्य भक्तपाठकलोकाय योगासक्तिवर्धनाय उपकरोति एतदद्भुतधार्मिक परिज्ञानं प्रपञ्चपरिचयं कर्तुं जून् २१, २०१५ वर्षे प्रप्रथमतया अन्तर्जातीय योगदिनोत्सवः समायोजितः। तद्वारा, योगप्रामुख्यं प्रपञ्चे आरोग्यमानसिक स्थिरत्वाय उपकारोतीति सर्वैः ज्ञातम्। योगः सत्यजीवनमार्गः। उत्तमजीवनमार्गदर्शकः। सर्वेजनास्सुखिनो भवन्तु मा कश्चिद्दुःखमान्पुयात् इत्याध्यात्मिकसंकाल्पाय योगः मूलमन्त्रम्। योगदिनोत्सवसन्दर्भादारभ्य दिनचर्यायां किञ्चित्समयं विभज्य आत्मशुद्धिः आरोग्यवृद्धिः सर्वैः सम्पादनीया। वर्षे वर्षे अखिलाण्डकोटिब्रह्मण्डनायकाय प्रवर्तमाने ज्येष्ठाभिषेके अयं ज्येष्ठमासः। शुक्लत्रयोदशीतः पूर्णिमा पर्यन्तं वैखानसभगवच्छास्त्रविधिमनुसृत्य पूजादिकार्यक्रमान्, तिरुमल क्षेत्रे इममभिषेकं दृष्ट्वा श्रीनिवासदिव्याशिषः प्राप्स्यामः। अस्मिन्ज्येष्ठमासे वैष्णवभक्ताग्रेसरेभ्यः द्वादशाल्वारु प्रमुखेभ्यः नम्माल्वारुमहोदयेभ्यः शात्तुमोर पेरियाल्वारुमहाशयानां उत्सवागमः विशेषः। तत्संस्मरणं अस्माकं धर्मः। अस्मिन्नेव मासे पूरीक्षेत्रे जगन्नाथरथयात्रां नेत्रपर्वतया प्रवर्त यिष्यन्ति। तदा पूरीक्षेत्रं समैक्य समग्रतयोः प्रतीकं भासिष्यते। अत एव सर्वं जगन्नाथमयं इति ब्रुवद्भिः स्वामिस्मरणं सदा मोक्षदायकं भवति।

# जून् -२०२५

सम्पुटिः-१२ सञ्चिका-०३

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर ज्येष्ठशुद्धषष्ठ्यादिवारादारभ्य - आषाढशुद्धपञ्चमी सोमवारपर्यन्तम् - २०२५

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

## तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका




प्रसन्नवेङ्कटेश्वरस्वाम्यालयः अप्पलायकुण्ट वैभवम् 06
- डा के.कोटेश्वरय्य

नम्माल्वारुवैभवम् 08
- डा पि.माधवी

विष्णुचित्तः (पेरियाल्वारु) 10
- आचार्य जि.पद्मनाभम

परमयोगिन्याः श्रीतरिगोण्डवेङ्कमाम्बायाः अष्टाङ्गयोगसारः 11
- डा.यस्.शमा

श्रीशेषाद्रीशस्तुतिः 16
- श्री कन्दाल लक्ष्मीनारायणः

महापकारिणः महोपकारः सर्वोपकारेषु श्रेष्ठः 18
- डा.यन्.गुणवती

परदुर्बोधः प्रविनाशायैव (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

बालविनोदिनी 22

मुखचित्रम् - श्रीदेवीभूदेवी सहित श्रीगोविन्दराजस्वामी - तिरुपति।

अन्तिमपुटः- श्रीदेवीभूदेवीसहित श्रीप्रसन्नवेङ्कटेश्वरस्वामी - अप्पलायगुण्टा।

गौरवसम्पादकः-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -
प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -
श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri.helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*— प्रधानसम्पादकः*



# प्रसन्नवेङ्कटेश्वरस्वाम्यालयः

## अप्पलायकुण्ट वैभवम्

- डा.के.कोटेश्वरय्य, चरवाणी - ९९८५१२३२६२

**स्मरणात् सर्वपापघ्नं स्तवनादिष्टवर्षिणं।**
**स्मरणान्मुक्तिदंचेशं श्रीनिवासं भजेऽनिशम्।।**

पद्मावत्या विवाहनन्तरं श्रीवेङ्कटेश्वरः तिरुमलक्षेत्रस्य आग्नेय भागे योगिपर्वतस्य अधोभागे प्रसन्नवेङ्कटेश्वरस्वामीति प्रसिद्धिं गतः। इदमेव क्षेत्रं अप्पलायकुण्ट इति व्यवह्रियमानं भक्तेभ्यः दर्शनं ददाति। दक्षिणदिशि उन्नतयोग पर्वतः, उदीचिदिशि ईशान्यप्रान्ते प्रकाशमान जलाशयः। जलाशय परितः हरितसस्यक्षेत्राणि, एतेषां मध्ये दिव्यप्रशान्तधाम क्षेत्रं श्रीप्रसन्नवेङ्कटेश्वरस्वाम्यालयः। देवालयादस्मात् अप्पलायकुण्टस्य वैशिष्यं समुपपन्नम्। तिरुमलक्षेत्रस्य अस्य पुण्यक्षेत्रस्य अविनाभावाध्यात्मिकसम्बन्धः जातः। अयं देवालयः तिरुपति पट्टणात् १८ कि.मी दूरे तिरुचानूरुग्रामात् दक्षिणदिशि १० कि.मी दूरे प्रकाशमानमिदं दिव्यक्षेत्रं अप्पलायकुण्टप्रसन्नवेङ्कटेश्वरस्वाम्यालयः इति रुढिमभजत।

स्थलपुराणम् - भृगमहर्षिपरीक्षया कृद्धा लक्ष्मीः भूलोके कोल्हापुरक्षेत्रं (महाराष्टम्) प्राप्ता। श्रीनिवासः तदन्वेषणे आदिववराहक्षेत्रं प्राप्य वल्मीके गुप्ततया विद्यामानः यशोदा मातृसेवायामासीत्। ततः शेषाचलाटव्यां गजबाधां निवार्य पद्मावतीं रक्षित्वा तन्मोहे पतितः सीतैव आकाशराजस्य पुत्र्या पद्मावत्या अवश्यं मम तया विवाहः करणीयः इति वकुलमातरं प्रोवाच। नारदमहर्ष्यादेशात् पद्मावतीश्रीनिवासयोः परिणयः प्रवृत्तः। विवाहानन्तरं सुवर्णमुखीकल्याणी - भीमानदीनां त्रिवेणीसङ्गमे अगस्त्याश्रमे अगस्त्यमुनिना आतिथ्यं प्राप्तः श्रीनिवासः। ततः ऋषिप्रार्थनया षण्मासपर्यन्तं अगस्त्यमुन्याश्रमसमीपे सभार्यः कुटीरे कालं, यापयति स्म। तदा परिसरप्रान्तसञ्चारकाले योगपर्वतस्थानां योगीनां दर्शनं ददौ।

**योगिपर्वतः** - शुकमहर्ष्याश्रिमस्य दक्षिणदिशि विद्यमानः पर्वतः योगिपर्वतः इति व्यवह्रियते। बहुगुहाभिः फलवक्षैः शिवलिङ्गैः सिद्धयोग्युपासकैः आध्यात्मिकचैतन्येन पर्वतः भासते। कदाचित् साधकः सिद्धय्यः अत्र तपः कुर्वन् सञ्चरति स्मेति वदन्ति। पद्मावती श्रीनिवासौ सानन्दं विहरन्तौ सिद्धय्यतपसः सन्तुष्टौ वरं याचितुं तं पप्रच्छतुः। सः अस्मिन् पर्वते अभयमुद्रया प्रसन्नः मम दर्शनं दत्तवन्तौ युवामत्रैव भक्ताननुगृह्य स्थातव्यमिति प्रार्थयामास। श्रीनिवासः तथास्तु इति अङ्गीकृत्य योगपर्वतस्य अधोभागे प्रसन्नवेङ्कटेश्वरस्वामित्वेन अभयकटिहस्तमुद्रया शंखचक्रधारी सन् चतुर्भुजैः वक्षःस्थले श्रीवत्सचिह्नेन भक्तेभ्यः तत्क्षणवरप्रदाता सन् अत्रैव वर्तते। भक्तकल्पवृक्षः प्रसन्नवदनारविन्दः भासते। अत्र प्रसन्नवेङ्कटेश्वरस्वामिनः


लोका भिन्नरुचिः, न जातु कामः कामानामुपभोगेन शाम्यति।

शनिवारपूजा श्रवणानक्षत्रयुक्ता सत्वरवरप्रदायिनीति भक्ताः शनिवारे सहस्राधिकतया आगत्य स्वामिनं पूजयन्ति। सिद्धय्यकारणादेव अस्य, प्रान्तस्य अप्पलायकुण्टेति नाम प्रसिद्धमिति जनश्रुतिः।

**अन्यकथा -** अप्पुलय्यनामकयात्रिकः अत्र वेङ्कटेश्वरस्वामिदर्शनं कृत्वा वृक्षछायां निद्रां प्राप्य ततः उत्थाय सावेगं तिरुमलक्षेत्रं गतः। तत्र स्वात्मना आनीतां धनसञ्चिकां सुप्तोत्थितः आनेतुं विस्मृतोऽस्मीति योगपर्वताधस्थ वेङ्कटाचलपतिं "हे स्वामिन् विस्मृता धनसञ्चिका लब्धा चेत् तव सन्निधावेव योगपर्वताधः प्रस्थाने भक्तजनदाहपरिहारार्थं जलाशयं निर्मिष्यामीति ध्यात्वा तत्स्थानमागत्य धनसञ्चिकां यथास्थाने अपश्यत्। तदा सानन्दं अचिरकाले जलाशयं निर्ममे। तस्मात् कालात् सः जलाशयः अप्पुलय्यकुण्ट इति कालक्रमेण अप्पलायकुण्ट इति नाम्ना परिणतमिति वदन्ति।

**अप्पुलेनिकुण्ट -** पुरा तद्ग्रमस्थाः जलाभावेन बाधिताः जलाशयनिर्माणाय बहून् कर्मकारिणः आहूय अप्पुविना प्रत्यहं धनं कर्मकरिभ्यः नियमबद्धतया ददुः। जलाशय निर्माणं परिपूर्णमासीत्। पर्याप्तं जलं जलाशयनिर्भरमासीत् तस्मात् कालात् अप्पुविना परिपूर्ण जलाशयनिर्माणमिति अप्पुलेनिकुण्ट इति व्यवह्रियमानः सः कालक्रमेण अप्पलायकुण्ट इति नाम्ना प्रसिद्धमिति केचिद्वदन्ति। अप्पलायकुण्टे स्नानमाचर्य स्वामिदर्शनं प्राप्तश्चेत् ऋण बाधाविमुक्तिः अवश्यं स्यादिति विश्वासेन भक्ताः अत्र आगत्य स्वामिदर्शनं प्राप्नुवन्ति।

कार्वेटिनगरपालकाः अप्पलायकुण्टक्षेत्रस्य उत्सवेषु भागस्वामिनः भूत्वा नवरत्नकिरीट सूर्यकठारि नामक नन्दक, खड्गं, वाहन, रत्नानि, दिव्यालङ्कारान् आभरणानि च ददुरिति शासनद्वारा ज्ञायते। कार्वेटिनगरपालकेषु कटारिसल्वमकराजः श्रीवेङ्कटेपेरुमाल्राजः श्रीवेङ्कटेश्वरपरमभक्तः अप्पलायकुण्टालयजीर्णोद्धरणं कृत्वा देवालयनिर्वहणोत्सव व्ययनिमित्रं भूमिं मोन्यरूपेण ददाविति सोऽपि उत्सवेषु स्वयं भागस्वामी अपि बभूवेति १७५० वर्षे तेन बहुमानरूपेण समर्पितदीपस्वम्भौ अद्यापि तथैव सन्तीति शिलाशासनं दृश्यते।

श्री अक्षयसंवत्सर वैशाखसुद्ध १५ अनृणसरोवर नगराधीश्वर श्री वेङ्कटेश्वरस्वामि सन्निधौ श्रीमहामण्डलेश्वर कटारिसाल्वराज श्री वेङ्कटपेरुमालूराज देवमहाराज समर्पिताखण्डदीप स्तम्भाः विजयतेतराम्।

अस्य शासनस्य पश्चिमदिशि खड्गचिह्नं पार्श्वद्वये सूर्यचन्द्रमुद्राः, वराहमुद्रायां चित्रिताः। कविपण्डितः अयं अष्टदिग्गजकविपोषककृष्णदेवराय इव सारङ्गपाण्या - द्यष्टदिग्गजकवीनू पोषयामासेति प्रमुखाधाराणि वर्तन्ते। अयं सारङ्गपाणिकविः प्रसन्नवेङ्कटेश्वरमधिकृत्य सारङ्गपाणि पदानीति गानात्मकपदानि व्यरचीत्।

श्रीशेषशैलसुनिकेतनदिव्यमूर्ते,
नारायणाच्युत हरे नलिनायताक्षे।
लीलाकटाक्षपरिरक्षितसर्वलोक
श्रीवेङ्कटेश मम देहिकरावलम्बम्।।

**श्रीवेङ्कटेशवैभववर्णनम् -**

१. येस्मरन्ति महादेवं श्रीनिवासं विमुक्तिदम्।
कीर्तयन्तश्चविप्राः तेमुक्ताः पापपञ्जरात्।।
२.नारायणं परं देवं वेङ्कटेशं प्रयान्ति वै।
पूजितं शङ्खराजेन सच्चिदानन्दविग्रहम्।।
३. तस्य स्मरणमात्रेण यमपीडाऽपि नो।
भवेत् श्रीनिवासं महादेवं येऽर्चयन्ति सकृन्नराः।।
४. किं दानैः किं व्रतैस्तोषां किं तपोभिः किमध्वरैः।
वेङ्कटेशं परं देवं यो न चिन्तयति क्षणम्।।
५. अज्ञानी स च पापी, स्यात् सभक्तो बधिरस्तथा।
सजडोऽन्धश्चविज्ञेयः वाञ्छितं तस्य सदा भवेत्।।
६. श्रीनिवासे महादेवे सकृदृष्टे मुनीश्वराः।
किं काश्या, गययाचैव प्रयागेनाऽपि किं फलम्।।
७. दुर्लभं प्राप्य मानुष्यं मानवा इह भूतले।
वेङ्कटेशं परं देवं ये पश्यन्त्यर्चयन्ति वा।
८. जन्म तेषां हि सफलं ते, कृतार्थाश्च नेतरे।
शम्भुना ब्रह्मणा किं वा शक्रेणाप्य खिलामरैः।।
९. वेङ्कटेशे महादेवे भक्तियुक्ताश्च ये नराः।
९. तेषां प्रणामस्मरण पूजायुक्तास्तु ये,नराः।।
न तेपश्यन्ति दुःखानि नैवयान्ति यमालयम्।

# नम्माल्वारुवैभवम्

- डा.पि.माधवी
चरवाणी - ८५१९८०४७८४




वृषभे तु विशाखायां कुरुकापुरि वासिनम्।
पण्ड्ये देशे कलेरादौ शठारि सैन्यप भजे॥
श्रीविज्ञानदिनोत्तरेऽहनि कलौ वर्षे प्रमाद्याह्वये
मासे माधवनाम्नि भागवदिने चर्क्षोविशाखाभिदे
लग्ने शुद्धचतुर्दशी तिथियुते श्रीमत्कुकीरेपि च
क्षित्यां प्रादुरभूत्पराङ्कुशमुनिर्भाग्योदयान्मादृशां।

द्वादशाल्वरुमहाशयेषु अतिप्राशत्स्यवान् नम्माल्वारु महाशयः। अस्य जीवितमतीव विचित्रम्। अयं उडैयनंगैकारिदम्पत्योः पुत्रः शठकोपयोगिकुरुगुरुस्थपरमपदनाथस्य अनुग्रहाज्ञातः वरपुत्रः। मुकुन्दसेनापतिः विष्वक्सेनः एव कारिदम्पत्योः पुत्रत्वेन जातः इति वैष्णवपरम्परायां विश्वासः। शठकोपः प्रमादिनामसंवत्सरे वैशाखशुक्ल चुतर्दश्यां विशाखानक्षत्रयुक्त कटकलग्ने सज्ञातः। प्रायशः जातमात्रादेव शिशूनां चलनचेष्टाः दृश्यन्ते। परन्तु कारिदम्पत्योः सञ्जातपुत्रे चलनवीक्षणरोदनस्तन्यपानादीनि नाभूवन्तथापि तस्य देहः बालसूर्यवत्प्रकाशते स्म। एतादृशशिशूदयात् विषादग्रस्त दम्पत्योः आदिनाथः भगवान् अहमेव शिशुसंरक्षणबाध्यातां स्वीकरिष्यमीत्यवोचत्। तौ दम्पती दैवदत्तशिशुं दैवमेव रक्षिष्यतीति आदिनाथदेवालयपरिसर तिन्त्रिणीवृक्षशाखायां डोलां बध्वा डोलापेटिकायामेव शिशुं निक्षिप्य जग्मतुः। तस्यामेव डोलायां पितृगमनानन्तरं सिंहकिशोर इव डोलायाः बहिरागत्य तिन्त्रिणी वृक्षगुहायां प्रविवेश। तस्य विष्वक्सेनः एव पञ्च संस्कारान् चकार। समान्यबालकेभ्यः विलक्षणतया बालकः षोडशवर्षावधावेव श्रीमन्नारायणध्यानजपैः कालं यापयति स्म। शिशुमहत्वं ज्ञात्वा कारिमारः, पराङ्कुशः, नम्माल्वारितिनाम्ना तं समाह्वयन्ति स्म। कारिपुत्रत्वात् कारिमारः, परमतस्थानामङ्कुशप्रायत्वात् पराङ्कुशः इति भक्तिपरिपूणत्वात् नम्माल्वारित्ययं प्रसिद्धिं गतः। आदिनाथेन अर्चकपुरतः वकुलमालिकानुग्रहात् वकुलभूषणः सञ्जातः। आदौ मधुरकविरेव नम्माल्वारुप्राशस्त्यं महत्वं विवेद मधुरकविः तीर्थयात्रासु उत्तरदेशपर्यटने कस्याञ्चिदात्रौ प्राग्दिशि एकं दिव्यं तेजः ददर्श। तद्दिव्यतेजोदर्शनार्थं मधुरकविः पर्यटन्नेव अन्ते तिन्त्रिणीगुहास्थ नम्माळवारु महाशये तद्दिव्यतेजो -विलीनं ददर्श। तदा सन्तुष्टः मधुरकविः अयमेव मम शरण्यमिति मुक्तिप्राप्तये सुलभोषायं वक्ष्यतीति विश्वस्तः बभूव। तदा नम्माळवारुमहाशयः ममायं उत्तमशिष्यः इति सम्भाव्य आदृत्य तस्य आध्यात्मिकसंशयान् परिहृतवान्। एवं

मधुरकवि नम्माळवारुमहाशययोः पाण्डित्यं यावज्जगति व्याप्तमासीत्। नम्माळवारुमहाशयः तिन्त्रिणी वृक्षगुहायामेव स्थित्वा बहुग्रन्थान् व्यरचीदिति परम्परावचनम्। अयं चतुर्वेद सारगर्भं प्रबन्धचतुष्टयं व्यरचीत्।

१. **तिरुविरुत्तम् -** ऋग्वेदसारग्रन्थः १०० पाशुरग्रन्थि विशिष्टः।

२. **तिरुवाशिरियं -** यजुर्वेदसार ग्रन्थः सप्तपाशुर विशिष्टः।

३. **पेरियतिरुवत्तदि -** अथर्वणं सारग्रन्थः ८७ पाशुरविशिष्टः

४. **तिरुनायमोलि -** छान्दोग्योपनिषद्विवारणात्मकः ११० पाशुरविशिष्टः ग्रन्थः वैष्णवाचार्याराध्य ग्रन्थः। अर्थपञ्चकविवरणम् - स्वस्वरूपम् परस्वरूपम् पुरुषार्थस्वरूपम्, उपायस्वरूपम् विरोधिस्वरूपविवरणम्

द्वयमन्त्रार्थनामक मन्त्रविवरणम् (लक्ष्मीनारायणसेवयैव सर्वदुःखविमुक्तिलाभः, विष्णुसायुज्य प्रापकज्ञानम्। अयमन्त्यादिक्रमे लिखितः ग्रन्थः।

मदुरकविरचितैकादश सूक्तेषु (कणिनुसूशिरुत्ताम्बुतिरुवडु गोगळिपठनं सम्प्रदायः।

नम्माळवारुपाशुरवैशिष्ट्यं मधुरभक्तिं यो मुनिः नायिकाभावमात्मन्यारोप्य चक्रिणं हरिं प्रापशठारिं तं वन्दे भगवत्कविम्। भगवानेक एव पुरुषः। अन्ये सर्वे स्त्रियः एव स्त्रीप्रायमितरं जगत्। नायिका भावं स्वस्मिन् भावचित्वा दैवस्तुतिगानमेव मधुरभक्तिः। एतादृशकवितायाः नम्माल्वारुमहाशयः आद्यः। एतन्मार्गानुसारी परकालयोगी। अत एव वैष्णवे द्वावपि नायिका भावयुताविति रुढिः जाता। आद्यः पराङ्कुशनायिका। द्वितीयः परकालनायिका। नम्माल्वारुमहाशयः तित्रिणीवृक्षे एव निवसति स्म। तस्य भाक्ति भावतुष्टाः अर्चामूर्तयः एव पुरतः साक्षात्कृताः। अयं ३१ दिव्यदेशमूर्तीः कीर्तयमास तेषु तिरुपति, श्रीरङ्गम्, कुम्भकोणः, प्रधानाः। पुरतः साक्षात्कृतमूर्तयः नम्माल्वारुमहाशयं मामधिकृत्य स्तुतिगानं कर्तुमयाचन्त।

तिरुमलेशमधिकृत्य गीतापाशुराणि ५२१ नायिका विरहवेदनया कृशीभूतशरीरा बभूव। माता नायिकानैजं ज्ञात्वा भूतवैद्य माह्वयामास। उरुगिन्दकन्मगळ् -

माता उपचारान् करोत्येव तस्याः शिरोजेषु तुलसीमालां निक्षिपन्तु पवित्रस्थलं प्रापयन्तु। वियोगे प्राणधारणमशक्यं किल। अस्यां परितापः अधिको भवति।

नम्माळवरुमहाशयः तिरुमल श्रीवेङ्कटेश्वरसन्निधिं प्राप्तु मत्यन्तं क्लेशाननुबभूव।

उलगं उण्डपेरुवाया उलप्पिल्कीर्त अम्भाने

एवं प्रार्थितवान् -

कूरायूनीरायूनेलनागि अस्मिन् पाशुरे स्ववेदनां

क्रूरराक्षसात् अनुगृह्णन्तु इति प्रार्थयामास।

स्वामि दिव्यमङ्गलाकारं

- व्रन्दाभूपोलेवारादायू

ममहृदये भवितुं न शक्नोमीति बाधामभिव्यक्तीचकार। एवं अन्यदेशमूर्तीरपि भक्तिभरितत्वेन तमिलभाषायां कीर्तयामास। मधुरकविः त्रिन्त्रिणी वृक्षस्थं दृष्ट्वा अज्ञातशास्त्रीयविषयान् बहून् विवेद। त्रिकरणशुद्धया तं आचार्यवर्यं मेने। तस्मिन् दिवङ्गते तिन्त्रिणी वृक्ष समीपे आलयं निर्मीय अर्चामूर्तिं प्रतिष्ठापितवान्।

''भक्तामृतविश्वजनानुमोदनं'' इति नाथमुनयः नम्माल्वारुमहाशयं पाशुरेषु प्रस्तुतवन्तः।

तिरुपति गोविन्दराजस्वाम्यालयपरितः नम्माल्वारु सन्निधिरप्यस्ति। अत्र पूर्वं वेङ्कटेश्वरप्राच्यकलाशाला प्रचलति स्म। अद्य सः देवालयः यात्रिकार्थं स्वर्धाम इव परिणतः ति.ति.दे. पर्यवेक्षणे सुरक्षितः। अत्रभागे नम्माल्वारुमूर्तिः पूजादिभिः शोभायमनः वर्तते।

१. माता पिता युवतय स्तनया विभूतिस्सर्वंयदेव नियमेन मदन्वयानां।

२. आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदघ्रिं युगलं प्रणमामि मूर्ध्ना मूलत्त्वंचित्, अचित्, ईश्वरः इति त्रीणि। चित् नाम जीवः। अचित् नाम प्रकृतिः द्वयोरधिपतिः ईश्वरः। भक्तिमार्गः सुलभमोक्षसाधकः सद्भावं आश्रयित्वा ईश्वरे भारसमर्पणं प्रपत्तिः। अनया मुक्तिः सुलभा।



# विष्णुचित्तः

## (पेरियाल्वारु)

- आचार्य जि.पद्मनाभम्,
चरवाणी -९२४७३२८२८६

पेरियाल्वारु उत्सवारम्भः अस्मिन् वर्षे जून् मासे २८ तिथिरिति निर्दिष्टम्।

ज्येष्ठास्वातीभवं विष्णुरथांशं धन्विनः पुरे।
प्रपद्ये श्वसुरं विष्णोः विष्णुचित्त पुरश्शिखम्।।
गुरुमुखमनधीत्य प्राहवेदानशेषान्।
नरपतिपरिक्लुप्तं शुल्कमादातुकामं।।
श्वसुरममरवन्द्यं रङ्गनाथस्य साक्षात्।
द्विजकुलतिलकं तं विष्णुचित्तं नमामि।।

दक्षिणदेशे सुप्रसिद्धपाण्ड्यदेशे धन्विनव्य -

पुरे विल्लिपुत्तरुनामान्तरे मुकुन्दायै नाम ब्राह्मणेत्तमः भार्यया पद्मावत्या बहुकालं अनपत्यतापीडितः विष्णुप्रार्थनया क्री.श. ७२५ वर्षे क्रोधनवर्षज्येष्ठमासे स्वातीनक्षत्र युक्त भानुवासरे पुत्रमेकमवाप।।

गरुत्मदंशजातस्य शिशोः सदा विष्णुमननकारणात् विष्णुचित्तः इति पितरौ नामकरणञ्चक्रुः। युक्तवयसः तस्य पेरियाल्वारु, भट्नाथ इति नामद्वयमपि रूढमासीत्। द्विजोचितसंस्काराः यथाकालं तस्य कृताः। प्रह्लादवत्पेरियान्वारु अपि बाल्यादेव भगवन्नाम एव धारकपोषक भाग्यमिव मेने। कलियुगे नवविध भक्तीनामाश्रयः सः विष्णुसेवानिरतः आसीत्। वटपत्रशायी क्षीरसागरनागपर्यङ्कं परित्यज्य उत्तरमधुराधिपतिकृष्णत्वेन अवततार। विष्णुचित्तः बालकृष्णलीलाः बहुधा भावयन् वटपत्रशायिनः तुलसी पुष्पमाला कैङ्कर्यं करोति स्म। मालाकैङ्कर्येण साकं भागवततदीयाराधान निमग्नः कालं यापयति स्म। विल्लिपुत्तूरुनगरस्य समीपे पाण्ड्यराजधानी मधुरा नगर्यासीत्। वल्लभदेवः राजा मधुरां राजधानीं कृत्वा पण्ड्यराज्यं पालयति स्म। राजा निशायां स्वराज्यव्यवस्थां ज्ञातुं वेषान्तरे पट्टणे सञ्चरन् ब्राह्मणवीथीषु सञ्चरन् शिलावेदिकायां शयन्तं आगन्तुकं दृष्ट्वा किमर्थमत्र आगतमिति पप्रच्छ। सः काशीगङ्गायां स्नात्वा सेतुदर्शनार्थं गच्छामीत्यवोचत्। ततः सः पान्यः राज्ञा पृष्टः "वर्षार्थ मष्टौ प्रयतेत मासान् निशार्थमर्थं दिवसं यतेत। वार्धक्यहेतोर्वयसानवेन परत्रहेतोरिह जन्मना च" इति उपदेशात्मकभावश्लोकं श्रावभामास। वर्षाकालावसरार्थं द्वादशमासेषु अष्टमासान् मानवेन आहारार्थं क्लेशानवाप्य सम्पत्सम्प्रादनीया। निश्यावश्यकानि दिवैव सम्पादनीयम्। वार्धक्यावश्यकानि युक्तवयसि एव सम्पादनीयम्। परलोकावश्यकपरमार्थः अस्मिन् जन्मन्येव सम्पादनीयम्। इति श्लोकर्थं वल्लभदेवः ज्ञात्वा परलोक प्राप्तेः परतत्त्वजिज्ञासा आवश्यकीति परतत्त्वनिर्णयार्थं वेदवेदाङ्गवेतॄणां पण्डितानां सभासमावेशाय सम्पत्पूर्णनामकपुरोहित माहूय सर्वदेशेभ्यः पण्डितानाहूय परतत्त्वनिर्णयार्थं सभां चर्चार्थं संसिद्धं कुरु इति आज्ञापयामास।

वल्लभदेवः रात्रौ गूढनरवेषेण आत्मना दृष्टं ब्राह्मणमपि आहूय सन्मानयामास। राजाज्ञानुसारं परतत्त्वशुल्कत्वेन राजसभायां तोरणस्तम्भे सर्वनेत्रगोचरतया धनसञ्चिकामेकां वबन्धुः। निष्पक्षपाततया परतत्त्वनिर्णये जाते सति,

(अनुवर्तते १५)

# परमयोगिन्याः श्रीतरिगोण्डवेङ्गमाम्बायाः अष्टाङ्गयोगसारः

- डा. यस.् शमा चरवाणी - ८४९८८८८२२५



योगो नाम समैक्यम् पृथक्विद्यमानवस्तुनोः एकत्र भासः योगः। प्रधानतया जीवात्मानं परमात्मनि, लयीकरणमेव योगस्य परमावधिः। योगशास्त्रबोधनलक्ष्यमिदमेव। भारतीयानां तत्त्व शास्त्रममुमेव विषयं भिन्नभिन्न प्रकारैः विशदी करोति।

अनन्तशाश्वतचैतन्यपरमात्मनः पृथग्भूतः जीवात्मा। तद्विषयं विस्मृत्य इन्द्रियवशः जीवात्मा मोहेन अनेकदुश्यर्चापतितः, तत्पापफलतया मायाधीनः पुनः पुनः जननमरणचक्रे पतन् निरवधिक बाधातप्तोभवति। एतज्ञननमरणवलयात् कदा, विमुक्तिं प्राप्स्यामीति अविरलं चिन्तयति। तद्वारा इन्द्रियानधीनः मय्येव आध्यात्मिक शक्तिः अन्तर्गततया वर्तते इति ज्ञात्वा मानवः तस्य योगशक्ति प्रभावः इति विवेद। अनया आध्यात्मिक शक्त्या आत्मोद्धरणाय निमीलितनयनः स्वस्मिन्नेव आत्मनं द्रष्टुं प्रायतत। तद्वारा मुक्तिमपि प्राप्तुं निरन्तरानुष्ठाने, लग्नः भवति। अयं प्रयत्नः व्यक्तिगतः। अस्मिन्मार्गे सिद्धिं प्राप्तुं बहूनि जन्मान्यवश्यकानि। योगसिद्धाः महात्मानः सप्तर्षयः व्यासवाल्मीकादि महर्षयः राजर्षयः ब्रह्मर्षयः सनातनधर्मे मुक्ताः दृश्यन्ते।

**महायोगशास्त्रमेव भगवद्गीता - :** द्वापरयुगे श्रीकृष्णः अर्जुनाय गीतामुपदिशन्निदं योगशास्त्रमित्युवाच। नायं तव प्रथमोपदेशः इदं योगशास्त्रं, मया सूर्याय उपदिष्टम् सूर्यः मनवे मनुः इक्ष्वाकवे क्रमशः अनेक राजर्षिभ्यः उपदिष्टोयं राजयोगः इति प्रचारमलभत पश्चात् विस्मृतमिदमहं तुभ्यमुपदिशामीति श्रीकृष्णवचनम्। कदाचित् कपिलमहर्षिः पुत्रव्यामोहपतितायै देवहूतिमात्रे इदं योगशास्त्रमुपिदिश्य तस्यै विमुक्तिं ददौ।



एवं पुत्रवात्सल्येन अमायकतया बाध्यमानानसूयामात्रे साक्षाद्दत्तात्रेयस्वामी तत्त्वोपदेशेन योगमुपदिश्य तां ज्ञानवैराग्यसम्पन्नां कृत्वा तपसे सह्याद्रिमगमत्

योगाभ्यासात् आदौ भौतिकशरीरारोग्यं देहपटुत्वं पश्चात् प्रशान्तचित्तशुद्धिः भवेत्। अन्ते पराकाष्ठादशायां परमात्मदर्शनं भवेत्। तदा जीवात्मा शाश्वतपरमात्मनिलीनो भवेत्।

**मातृश्रीतरिगोण्डवेङ्गमाम्बा राजयोगः -** एवं परम्परा गतयोगविद्यामधिकृत्य सिद्धयोगिनी मातृश्रीतरिगोण्डवेङ्गमाम्बा श्रीवेङ्कटाचलमाहात्म्यम् राजयोग सारः, इति पद्यकाव्यद्वये अष्टाङ्गयोगसारः इति द्विपदकाव्ये सुलभशैल्यां व्यवरीत्।जन्मतः परमभगवद्भक्तिमतीयं बाल्ये एव वैराग्यस्थितै वर्धमाना योगमूर्तिं सुब्रह्मण्यस्वामिनं गुरुमवाप। तद्गुरोः मन्त्रदीक्षाहस्तमस्तक संयोगात् सिद्धिमवाप्य योगतत्त्वे परमयोगिनीव व्यराजत। तिरुमल क्षेत्रं प्राप्तेयं तुम्बुरु तीर्थादितीर्थेषु पर्वतसानुसु तीव्रं तपः आचर्य सिद्धयोगिनी बभूव। गुरोरनुग्रहात् स्व साधनेन प्राप्तसिद्धयोग विद्यां आन्ध्रजनेभ्यः बोधयितुं दीक्षामवलम्ब्य सुलभमार्गमनुसृतवती। अस्याः प्रयत्नः सफलः जातः।

परब्रह्म परमपरमिति द्विविधम्। परं अक्षरं शाश्वतम् अपरं क्षरम् नश्यत्स्वभवम् परमात्मा अक्षरः क्षरः जीवात्मा। परमात्मनः अंशतः एव जातः जीवात्मा। सः अविद्यामायावशात् बहुजन्मसु बहून् देहान् प्राप्य व्यामोहशोकसमुद्रे जीवात्मा पतितः निमज्ञनोत्मज्ञनानि पुनः पुनः प्राप्नोति। अहङ्कारममकारादिभिः बहूनि पापानि कुर्वन् जननमरणानि प्राप्नोति। एतादृशजीवात्मनः मुक्तिमार्गं वेङ्गमाम्बा सुलभपद्धत्यां प्रदर्शितवती।

**योगाभ्यासस्य अष्टाङ्गमार्गः -** सद्गुरुद्वारैव योगमधिकृत्य उपदेशः प्राप्तव्यः। १. यमः २.नियमः, ३. आसनम् ४. प्राणायामः ५. प्रत्याहारः ६. ध्यानम् ७. ध्यानम्

८. समाधिः इत्यष्टाङ्गानि क्रमशः अभ्यस्यानि। आहारनिद्राभ्यां इन्द्रियनिग्रहेण शान्तचित्तत्वं यमः दुढगुरुभक्त्या एकान्तवैराग्यं नियमः, सुखेनसाकं स्थिरासने स्पृहेण विना, मनः आत्मनि स्थिरीकरणं आसनम्। वायुं गुरुक्तरीत्या उच्छ्वासनिश्श्वासाभ्यासः प्राणायामः, प्राणायामात् मनोविकारैः विना स्थिरीकरणं प्रत्याहारः। स्वस्मिन्नेव विद्यमानः आत्मासर्वत्र व्याप्तः इति ज्ञानभावः ध्यानम्। स्वस्मिन् बाह्याभ्यन्तरयोः तेजोरूपेण प्रकाशमानं परमात्मानं मनसि स्थिरीकरणं धारणम्। अन्ते जललीनशर्करावत् परमात्मनि जीवात्मानं लीनीकरणं समाधिः।

योगाभ्यासाय अष्टाङ्गमार्गेण सकं, तरिगोण्डवेङ्गमाम्बा समाधियोगे षट्चक्राणि, अजपागायत्री, लययोग पद्धतिः हठयोगपद्धतिः, भौतिककर्म, वस्तिकर्म, नेति, त्राटक नौलिकर्म कपालभावेत्यादिषट्कर्माणि, सूर्यभेदन, कुम्भकानि, सांख्ययोगं तारकयोगं, अमनस्कयोगं (शाम्भवीमुद्रा) मन्त्रलयादियोगानुभव मार्गं प्रदर्शितवती।

राजयोगिलक्षणानि, राजयोगिनः आत्मयज्ञमित्यादि योगाभ्यासविशेषान् विशदीकृत्य एतान् सर्वान् सद्गुरुद्वारा सच्छिष्यत्वेन उपदेशः प्राप्तव्यः इति वेङ्गमाम्बया स्पष्टीकृतम्। तादृशं संक्लिष्टं योगाभ्यासं केवलं गुरोरनुग्रहात् प्राप्ता मतृश्री तरिगोण्डवेङ्गमाम्बा १७३० वर्षे चित्तूरुजिल्ला तरिगोण्डग्रामे जनिं लेभे। पश्चात् तिरुमलक्षेत्रं गत्वा तत्र मार्किं (९०) नवतिवर्षपर्यन्तं जीवित्वा १८१७ वर्षे श्रीवराहस्वाम्यालयपुरतः वराहस्वाम्यतिथि गृहपार्श्वभागे योगसमाधिं प्रविष्टा। अद्यापि तिरुमल क्षेत्रे नित्यं रात्रौ अन्ते प्रवर्तमाने श्रीपतेः मौक्तिकारार्तिक-एकन्तसेवायां वेङ्गमाम्बा योगशरीरेण बृन्दावनादागत्य आलयं प्रविश्य भागस्वामिनी भवतीति प्रतीतिः। इयं योगिनी तिरुमलपर्वत सानुसु योगशरीरेण सञ्चरतीति ७० वर्षेभ्यः प्राक् प्रत्यक्षद्रष्ट्रा श्रीमलयालस्वामिमहनीयेन प्रोक्तम्। साधनात् कार्याणि सिद्धयन्तीति वचनमनुसृत्य सिद्धयोगिन्या मातृश्रीतरिगोण्डवेङ्गमाम्बया



विरचिताष्टाङ्गयोगसारे सुलभावगम्य प्राणायामाद्याष्टनियमान् आचरद्भिः जिज्ञासुभिः तस्मिन्नेव मार्गे अभ्यासः कृतश्चेत् शरीरपटुत्वारोग्यमनश्शान्तितेजोबलादयः सिद्ध्येयुः। अस्मिन्नेव प्रयत्ने दीक्षाभ्यासेन पुरोगामित्वं चेत् गुर्वनुग्रहेण दैवानुग्रहेण दैवदर्शनं प्राप्स्यामः इति विश्वासेन योगाभ्यासमाचरेम। आनन्दनिलयस्य वेङ्कटेश्वरस्य अनुग्रहात् आध्यात्मिकानन्दमनुभवन्तः जीवितसार्धक्यं प्राप्स्यामः। इदं शरीरं षटचक्रयुतम्। मूलाधारचक्रे गणेशः वर्तते इति ततः अङ्गुलद्वयानन्तरं स्वाधिष्ठानचक्रे ब्रह्मा वर्तते इति ततः ऊर्ध्वं षढङ्गुलानन्तरं नाभिस्थाने मणिपूरनामकचक्रे विष्णुः वर्तते इति तदुपरि दशाङ्गुलदूरे हृदये अनाहतचक्रे रुद्रः विराजते इति तदुपरि कण्ठभागे विशुद्धचक्रे सदाशिवः प्रधानदैवत्वेन वर्तते इति तदुपरि भ्रूमध्यभागे विद्यामान आज्ञाचक्रे परमात्मा अथवा परब्रह्म प्रकाशते इति वदन्ति। एतेषां सर्वेषामुपरि शिरसः मध्यभागः। अत्र सहस्रारचक्रे सहस्रदलपद्मे सद्गुरुपद्मपादौ प्रकाशते इति एतानि सर्वाणि योगसाधकाः नित्यं पश्यन्तीति विज्ञवचन परमसत्यं अनुभवोक्तमेव। एवमेव सप्तगिरीशक्षेत्रमपि षट्चक्रमयं महिमान्वितं दिव्यक्षेत्रम् एकैकशैलमेकं चक्रम्। षाट्पर्वताधिरोहात् अन्ते सप्तमपर्वते सहस्रदलपद्मम् सहस्रारचक्रे प्रकाशते। तत्र आनन्दनिलयं द्रष्टुं शक्यते। योगशास्त्रज्ञैः कथ्यमानमन्त्रतुल्यवाक् केति चेत् निरन्तरं सहस्रारचक्रमिव भासत्सप्तशैले अद्यापि योगशरीरे श्रीवेङ्कटेशं ध्यायन्ती सञ्चरन्मातृ श्रीतरिगोण्डवेङ्गमाम्बानिर्दिष्ट योगपथे पुरोगयनाय अस्माभिः प्रयत्नः कर्तव्यः। नित्यनमस्कारर्यस्य अस्य भगवतः दयया परमानन्दमनुभवेम।

तेलुगुमूलम् - श्री जूलकण्टि बालसुब्रह्मण्यम्
संस्कृतानुवादः - डा. यस्.शमा
चरवाणी - ८४९८८८८२२५



(दशमपुटात्)

धनसञ्चिका अधः पतेत्। वादविजेता तत्सञ्चिकाग्रहणर्हः इति प्रकटितम्। तस्मिन् समये तन्नगरपालकः भगवान् वटपत्रशायी एवममंस्त। ''मत्कैङ्कर्यप्रवणः भागवतसेवापरतन्त्रः विषयवासनादूरः निष्कल्मः भट्टनाथः विष्णुचित्तः एव परतत्त्व निर्णययाय समर्थः इति निश्चित्य स्वप्ने तस्य साक्षात्कृत्य तं सम्बुद्धय भक्ताग्रगण्य! वैष्णवभक्तितत्त्वं लोके प्रचारचितुं समयः आसन्नः। पाण्ड्यराजप्रवर्तितपरत्त्वसभां गत्वा विष्णु प्रारम्यं स्थापय वादनैपुण्यं प्रदर्शय इत्यवोचत्। झटिति स्वामिस्पर्शात् पुलकितगात्रः दर्शनात् आनन्दपरवशः झटित्येव चिन्ताक्रान्तः अभवत्। विद्यागन्धरहितः कथमहं परतत्त्वनिर्णयं कर्तुं शक्नोमि। स्वामिकैङ्कर्यार्थमग्निप्रवेशस्याप्यहं सिद्धः परतत्त्वनिर्णयकर्तुमहमशक्तोस्मीति विष्णुचित्तः निस्सङ्कोचं भगवते विज्ञापयामास। तदा भगवान् तव वादसामर्थ्यमहं दास्यामि त्वं विद्वत्सभां गच्छेति तं शासितवान्। भगवदादेश मनुसृत्य विद्वत्सभां प्रविवेश। महाराजः एव सम्पत्पूर्णेन सह विष्णुचित्ताय स्वागतमुक्त्वा तस्यैव साष्टाङ्गनमस्करं कृत्वा सिंहासीनं कृत्वा आत्मानं धन्यं मेने। तदा सामान्यालयसेवकाय अनर्घपूजेति विद्वज्जनस्य हृदयशल्यमभूत्। ते राजपुरोहितमुद्दिश्य राजा गुणदोष विचक्षणरहितः भगवन्मालाकारी निकृष्ट ब्राह्मणजातिजः राजसिंहसने प्रतिष्ठितः। इति वदन्तः सभाबहिष्कारं कर्तुं प्रायतन्त। विद्वकविः राजपुरोहितः तान् सक्लेशं सान्त्वयामास। विष्णुचित्तः विशिष्टाद्वैतमनुसृत्य परतत्त्वं प्रतिपाद्य प्रतिष्ठापयितुं प्रथमतः महाविष्णोः प्रार्थनां चकार। महाविष्णुः विष्णुचित्ते एव स्थित्वा सर्ववेदान्तसारं करतलामलकञ्चकार। तस्य जिह्वाग्रे स्थितः विष्णुचित्तेन एवं वाचयामास।

१. सर्वार्थाः वेदगर्भास्थाः वेदश्चाष्टाक्षरेस्थितः अष्टाक्षरस्तु प्रणवे अकारे प्रणवः स्थितः वेदाच्छास्त्रं परं नास्ति न दैवं, केशवात्परम्।। सर्वे पदार्याः वेदे एव सन्ति। वेदः अष्टाक्षरी मन्त्रे वर्तते। अष्टाक्षरी प्रणवे ओकारः अस्ति। ओंकारस्य अकारः मूलः। वेदादौ ओकारः वर्तते। अ-उ-म मिश्रः एव ओं। अतः ओङ्कारः वेदमूलः। अकार एव वेदान्तस्य ब्रह्मविद्यायाः मूलम्। ब्रह्म एव पर तत्त्वम्। परतत्त्वस्य मूलोप्यकार एव। दृश्यमान प्रकृतिस्रष्टैव परः। सः एवं स्थिति लयकर्ता। सःपरः परमात्मा परब्रह्म, अक्षराणामकारोस्मीति गीताचार्येणाप्युक्तम्। अकार एव सर्वस्याप्यात्मा। अकार एव विष्णुवाचकः। अन्यदेवताः नायं वदति। अकारवाच्यः विष्णुः परतत्त्वं श्रीमन्नारायणः, ब्रह्मविष्णुमहेश्वरेषु मोक्षप्रदाता। 'मोक्षमिच्छेज्जनार्दनात्' इत्यभियुक्तोक्तिरपि वर्तते। अतः अकारवाच्यः श्रीहरिरेव मोक्षप्रदाता इति कथने विप्रति पत्तिर्नास्ति। विष्णोरूद्भूतं जगत् तस्मिन्नेव लयीभवति। अतः नारायणात् अन्यत् परतत्त्वं न भूतो न भविष्यति। वेदपुराण सारः अयमेवेति दक्षिणहस्तमुत्थाप्य घोषयामि। वेदादधिकं शास्त्रं, केशवादधिकं परतत्त्व न कुत्रापि जगति वर्तते। सत्यं सत्यं पुनस्सत्यम् इति परतत्वनिर्णयकथनानन्तरमेव परतत्त्व शुल्कधनसञ्चिका विष्णुचित्तपादयोरपतत्। झटिति तां विष्णुचित्तः स्वीचकार। वल्लभदेव महाराजः विष्णुचित्तं सम्बुद्ध्य जय विष्णुचित्तार्य जय जय परतत्त्वनिर्णायक जय जय जय इत्यवोचत्। विद्वद्राजसभायां करतालध्वनयः गगनस्पर्शिनः आसन्। चतुरयुक्तिभिः परतत्त्वनिर्णयकर्तारं विष्णुचित्तमनुग्रहीतुं महाविष्णुः गरुडारूढः श्रीभूनीळादिव्यमहिषीभिः अनन्तविष्वकसेन परिवारैः साक्षात्कृतः। ब्रह्मरुद्रदिदेवाः नारदादिमहर्षयः, सभास्थलं प्रापुः। विष्णुचित्तेन सह सभास्थाः सर्वे महाविष्णुदर्शनं प्राप्य ब्रह्मानन्दपरवशाः आसन्।

**मङ्गलाशासनम् -** महाराजः विष्णुचित्तं गजारूढं कारयामास छत्रचमारादिभिः अन्यराजानः मन्त्रिणः तं सेवमानाः अनुययुः। भक्तविष्णुचित्तस्य सन्मानं स्वयं द्रष्टुं श्रीहरिः राजसभायां प्रत्यक्षमभूत्। विष्णुचित्तः परमानन्दभरितः हृद्यमृदुमधुरद्रविड पाशुरगानेन स्वामिने आशीर्ददौ। द्वादशगाथात्मकमङ्गलाशासन कृतिरेव तिरुप्पल्लाण्डै इति नाम। दिव्यस्थलेषु द्राविड वेदाध्ययनात्पूर्वं विष्णुचित्तप्रोक्त पल्लाण्डुगानानन्तरमेव अन्य स्तोत्राणि देवालयेषु प्रवर्तन्ते। एवं प्राप्तघनगौरवं विष्णचित्तं राजा सुवर्णशिबिकारूडं कृत्वा छत्रचामरमङ्गलवाद्यघोषैः स्वस्थलं विल्लीपुत्तरूं प्रापयामास। नगरवासिभिः सर्वैरपि सत्कृतः सः यथा पूर्वं भगवते मालाकैङ्कर्यं करोति स्म।



श्री न च रघुनाथाचार्यप्रणीता

# श्रीशेषाद्रीशस्तुतिः

## सुवर्णसौरभव्याख्या समेता

### चित्तंमत्तगजबन्धनम्

(तदनन्तरम्)

व्याख्याता - डा. कन्दाल लक्ष्मीनारायणः
चरवाणी - ९९८५२३७३५३

श्लो.२२.

घृतरति विषयाख्य धत्तूरपुष्पे मनोमेऽनिशम्
वृषगिरिसुरभज सत्कीर्तिगुच्छेषु भृङ्गीयतु।
इदमतिशिशिरे विहन्तर्यघानां तदीयेऽमले
शुभतर गुणगङ्गापूरे सदा राजहंसीयतु।।

**ता** - शेषाद्रीश! इन्द्रिय विषयरूपाणि भौतिकसुखानि उन्मत्तपुष्पसदृशानि। अहितकराण्यपि तान्येव प्राप्तुं मम चित्तम् अत्यन्तम् उत्सुकं भवति। तादशं मे मनः वृषादौ कल्पवृक्षरूपेण अवतीर्णस्य भवतः बहुविधलीलाचेष्टित प्रशस्तिरूपेषु कीर्तन कुसुममञ्जरीषु भ्रमर इव आसक्तं भवतु इति अभिलषामि। भगवन्! एवमेव मे पापराशीनां नाशके सुखशीतले भवदीयकल्याणगुणरूपमन्दाकिनी प्रवाहे राजहंस इव सर्वकालेऽपि विहरतु इति प्रार्थयामि।

सु.सौ.व्याख्या- पूर्वस्मिन् श्लोके वेङ्कटनायकस्य पादयुग्मे एव चित्तस्य स्थिरत्वं कल्पयतु इति प्रार्थनं कृत्वा पुनरत्रापि भगवत्प्राप्तिविरूद्ध विषयेषु आसक्तं स्नान्तं ततो निर्वर्त्य स्वामि गुणानुभावे एव सर्वदा आनन्दं प्रापयतु इति प्रार्थ्यते।। विषयाख्यधत्तूरपुष्पे - प्रापञ्चिकानि सुखानि धूतूरकुसुम सदृशानि। धत्तूरो नाम उन्मत्तवृक्षकः। ''उन्मत्तः कितवो धूर्तो।





(अनुवर्तिष्यते)



क्षुदातुराणां न रुचिर्न पक्वम्।

घत्तूरः कनकाह्वयः - २.४.७७ इत्यमरः -धत्तूरकुसुमसेवने सति देहे घातवो, नश्यन्ति। ज्ञानप्रसारः स्थगितो भवति। प्राज्ञोऽपि उन्मत्तचितो भ्रान्तश्च भवति। एवमेव प्रापञ्चिक विषयासेवनात् च तेषु अनुक्तते देहातिरिक्तं वास्तवं स्वस्वरूपं च न जानाति, मनुजः। अतः तादश विषयासक्तेः चित्तं विरक्तं भूत्वा श्रीनिवासाख्यकल्पतरोः दशदिक्षु व्याप्तपरिमालवत्सु सद्गुणरूप पुष्पगुच्चेषु एव भ्रमरवत् आसक्ते भवतु इति आशास्यते। स्वान्तं लौकिकविषयभोगे, पुरा परित्यज्य भगवद्विषये एव अभिमुखं भवतु इति भावः।

**अघानां विहन्तरि** - भगवद्गुणानुभवः उपासकस्य पापानि नाशयति। श्रूयते च छान्देण्योपनिषदि - तद्यथा पुष्करपलाश आपोनशिष्यन्ते एवमेव विधि पापकर्म नशिष्यते - ४.१४.३ - तामरसपर्णस्य उपरि विद्यमाना जलबिन्दुः यथा तत्र श्लिष्यते, तथैव परमात्मोपासकस्य पापराशिः अपितस्मिन् पुरुषे न सङ्क्रामति, इति।

एवमेव तद्यथेपुकातूलमग्नौ प्रोतं प्रदूयेत, एवं हास्य सर्वे पाप्मानः प्रदूयन्ते - छा.५.२४.३. अग्नौ पतितः कार्पासखण्डः सद्य एव यथा नश्यति, तथैव ब्रह्मोपासकस्य पापनिकरमपि सद्य एव विनश्यति - इति च।

तदेवोक्तं ब्रह्मसूत्रेषु "तदघिगम उत्तरपूर्वार्घयोरश्लेष विनाशौ तद्यपदेशात् सू.४.१.१३. ब्रह्मविद्यानिष्ठस्य सञ्चितं पूर्वकालकृतं पापं नश्यति, तदुत्तरकाले क्रियमाणम् अपि पापं न श्लिष्यते - इति। तथा चात्र भगवद्गुणानुभवः सर्वपापनाशकः प्रस्तूयते।

अमले शुभ..... पूरे - अमले इत्युक्तेः गुणानां सोकमोहादिप्राकृतगुणरहितत्वं सूच्यते। शुभतर इत्युक्तेः मङ्गलकरत्वं ध्वन्यते। गङ्गाप्रवाहसादृश्यात् पावनत्वम् आह्लादकत्वं च द्योत्येते। पूरे इति वचनात् स्वामिनः गुणानां स्वाभाविकत्वम् नित्यत्वम् समृर्द्धिश्च प्रतीयन्ते।

अयमपि श्लोकः पूर्वश्लोकवत् महामालिकावृत्ते निबद्धः॥

(अनुवर्तिष्यते)

# साधनचतुष्टयम्



*सत्यान्वेषणाय अवश्यं साधनचतुष्टयमावश्यकम्। तदैव ब्रह्मानुभवः साध्यः इति महर्षिवचनम्। १. नित्यानित्यवस्तुविवेकः २. इहामुत्रफलभोगविरागः ३. शमदमादिषट्कसम्पन्तिः ४. मुमुक्षुत्वम् एतत्साधनचतुष्टयं रक्षणकवचत्वेन प्रतिसाधकेन आध्यात्मिकसाधनत्वेन साधनीयमिति आदिशङ्कराचार्यैः प्रोक्तम्। आदौ किं नित्यं किमनित्यं लोके ज्ञातव्यम्। इहपरलोककेषु सर्ववस्तुषु वैराग्यभावः जातव्यः। ततः शमदमादिषड्गुणवृद्धिः प्राप्तण्या। अन्ते तीव्र मुमुक्षुत्वं प्राप्तव्यम्। ब्रह्मसत्यं जगन्मिथ्येतिज्ञानमेव नित्यानित्यवस्तु विवेकः विवेकाद्विरक्तिः वैराग्यम्। विवेकवैराग्याभ्यां समचित्तता जायते। सर्वसुखभोगानुभवः अनित्यः। भोगवांछापरित्यागः वैराग्यम्। शमदमोपरतितितिक्षाश्रद्धासमाधानषल्लक्षणसम्पादनात् स्थिरचित्तधैर्याध्यात्मिकमार्गगमनार्हतां साधकः सम्पादयिष्यति। ततः अहङ्कार बन्धनविमुक्तिप्रापक तीव्रकांक्षारूपं मुमुक्षुत्वं साधकः अवश्यं प्राप्स्यति।*



# महापकारिणः महोपकारः

## सर्वोपकारेषु श्रेष्ठः

- डा.यन्.गुणवती

चरवाणी - ८९१९६२०२२६

कस्मिंश्चिद्ग्रामे कश्चित् ब्राह्मणः गौतमतनामकः निवसतिस्म। जन्मना ब्राह्मणोऽपि कुलधर्मान् परित्यज्य दुष्टसाङ्गत्यात् मत्स्यमांस भक्षकः किरातैः मिलितः म्लेच्छयुवतिं परिणीय धनसम्पादनाभिलाषेण वणिग्भिः सह सुदूरं गतः। ते गाढान्धकाराट्वयां सञ्चरन्तः स्वोपर्युत्पतन्मदगजभीताः प्राणरक्षणार्थं धावन्तः एकैकः सुदूरं गताः। तेष्वयं ब्राह्मणः क्षुदूबाधापीडितः किञ्चिद्दूरमपि गन्तुमशक्तः कस्यचित्वृक्षस्य छायायां मलयमारुतोपशमिततहतापः विश्रान्तः आसीत्। राक्षसाराजः विरूपाक्षः तत्प्रान्तं पालयति स्म। तस्य राजधानीनगरं मधुव्रजपुरम्। राक्षसराजोऽपि सः सद्गुणनिलयः आसीत्। तस्य ब्रह्मलोकादागतः कश्यपमित्रं, ब्रह्मणश्च आप्तमित्रं नाडीजंघो नाम श्रेष्ठपक्षी, बकः महामेधावी मित्रमासीत्। सः बकः दिव्यतेजस्सम्पन्नः राजधर्मनामकः क्षुदूबाधापीडितं तं वाह्मणं दृष्ट्वा उत्तमातिथिस्त्वं यथाविधिपूजामाहारञ्च स्वीकृत्य प्रातःयथेच्छं गच्छ इत्यवोचत्। ततः सः बकः कस्माच्चित् स्थानात् भोजनं तटाकाज्जलञ्चानीय ततः तं अतिथिदेव! कस्त्वं किमर्थमत्र आगतोऽसीत्यपृच्छत्। तदा सः ''अहं कुलम्प्रदायं परित्यज्य दुष्टसहवासात् म्लेछस्त्रियं परिणीय दुर्मार्गः कुलभ्रष्टः धनसम्पादनाय वणिम्भिः सह देशाटनं कुर्वन् मदगजात् पलायितः अत्र त्वया दृष्टोऽस्मीत्यवोचत्। तदा बकः ''समीपे मधुव्रजपुरे राक्षसाधिपः विरुपाक्ष नायकः मत्प्राणमित्रं वर्तते। अपेक्षितं धनं मद्वचनात् सः दास्यति। तस्मादपि अतिथिसत्कारं प्राप्य तं कृतार्थं कुरु इत्यवोचत्। तदा परमानन्दभरितः सः ब्राह्मणः विरूपाक्षनगरं प्रविश्य तत्र राजास्थाने आत्मानं नाडीजंघमित्रमिति आत्मनः, परिचयं ददौ। सः विरूपाक्षः स्वमित्रस्य मित्रमिति स्वर्णस्थाले षड्रसोपेतभोजनं समर्प्य ततः रत्नवज्रवैडूर्यादीनि वहनभारातीतानि समर्पितवान्। सः ब्राह्मणः तद्रत्नराशिभारं स्वीकृत्य अतिक्लेशतया वहन् नाडीजंघनिवासवृक्षसकाशमाजगाम। तदा आगतं सन्तुष्टं ब्राह्मणं दृष्ट्वा परमानन्दभरितः बकः आत्मानं धन्यं मेने। ततः सूर्ये अस्तङ्गते बकः रात्रौ सानन्दं निद्रावशः अभूत्। तदा पापी दुष्टब्राह्मणः दुर्मनस्कः कृतघ्नताबुद्ध्या तद्बकमांसाहारं खादितुमिच्छन् बकद्वारैव अपरिमितधनं प्राप्तोऽपि बकेन इतः परं आवश्यकता नास्तीति विश्वसाधातकः निद्रास्थबकपक्षौ विदीर्य निष्करुणः पाषाणहृदयः हस्ताभ्यां कण्ठबन्धनं चकार। कण्ठबद्धः सः बकः प्राणान् तत्याज। बकमांसं पिण्डीकृत्य तच्चर्मपरिहृत्य तन्मासं, चर्मसञ्चिकायां भद्रं निक्षिप्य तद्गृहीत्वा प्रस्थितः। राजा विरूपाक्षः प्रतिदिने एकवारं मिलन् मित्रं स्वसकाशं नागतम्।मया वज्रवैडूर्यनि प्राप्तः, प्रेषितः। मित्र द्रोहिणा तेन ब्राह्मेणन बकस्य प्राणहानिः कृतः स्यादिति ज्ञातुं स्वभटान् नाडीजंघनिवासवृक्षसकाशं प्रेषयामास। ते बकशल्यसमूहं दृष्ट्वा दुरात्मानमन्विष्य समीपे एव तं कृतघ्नं ज्ञात्वा बध्द्वा आनयामासुः। राजा बद्धं ब्राह्मणं भटान् दृष्ट्वा एनं हत्वा एतन्मासः किमर्थं युष्माभिः न भक्षितः इति इत्यवोचत् भटाः पापात्मनः भक्षणात् अस्माक्मपि पापं सम्भवेदिति कृतघ्नस्य, मृतदेहंशुनः

अपि न स्पृशन्तीति अवोचन्। ततः राजा मित्रमरणाद्विलपन् बकस्य अस्थिकानानीय सम्प्रदायबद्धतया दहनसंस्कारान् कारायित्वा निरन्तर दुःखशीलः आसीत्। मित्रवियोगबाधितं विरुपाक्षं स्मृत्वा द्रवीभूतहृदयः देवेन्द्रः विरूपाक्षसकाश माजगामराजा तत्पादयोः पतित्वा नाडीजंघं पुनरुज्जीवयितुं प्रार्थयामासा देवेद्रः नाडीजंघं पुनरुज्जीवयामास। उज्जीवितः नाडीजंघः यमपाशबद्धं ब्राह्मणं दृष्ट्वा तद्दुरवस्था मयैवागतेति तस्यापि प्राणदानं कर्तुं देवेन्द्रमयाचत। देवेन्द्रः बकौदार्यं विशालहृदयं ज्ञात्वा कृतघ्नब्राह्मणं पुनरुज्जीवयामास। राजा तं ब्राह्मणं हत्वा नरमांसाहारदस्युभ्यः दत्त इति भटानवोचत्। तदा आहूताः दस्यवः कृतघ्नब्राह्मणकृत्यं ज्ञात्वा वयं तन्नीचब्राह्मणमासं न वयं भक्षयिष्यामः इति राजानं भटांश्च उद्दिश्य प्रोक्त्वा ययुः। आन्ध्रसुमती शतकेऽपि उपकारिणः उपकाराचरणं सामान्यमेव। अपकारिण उपकाराचरणमेव सर्वश्रेष्ठौदार्यपरोपकारकार्यमिति प्रोक्तम्।''महाभारते शान्तिपर्वणि भीष्मेण युधिष्ठिरमुद्दिश्य प्रोक्तेयं कृतघ्नब्राह्मण कथा।''



# वरदराजस्वामी

२०२५ जून् पञ्चमदिनाङ्के वरदाराजस्वामिनः वर्षतिरुनक्षत्रं इति कालनिर्णयपट्टिकायां निर्दिष्टम्। श्रीवरदराजस्वाम्यालयः तिरुमलक्षेत्रे स्वाम्यालये विमानप्रदक्षिणमार्गे रजतद्वारदक्षिणदिशि १०८ अङ्गुलदूरे पश्चिमाभिमुखतया दृश्यते अयमालयः पदत्रयोन्नतशिलाधिष्ठाने अन्तरालयः, गर्भालयः इति द्विभागात्मना निर्मितः। गर्भालये शंखचक्र धारी चिन्मय हासेन तिष्ठन् श्रीवरदराजस्वामी ५ पादोन्नत शिलाविग्राहरुपेण अभयमुद्रया विराजते। गर्भालयेपरि वेसरशैल्यां एककलशगोपुरं निर्मितम्। माकिं २० पादवैशाल्ययुतालयपरितः भक्तैः प्रदक्षिणं कुर्वद्भिः गन्तुमनुकूलतया वरदराज स्वाम्यालयः द्वितीयप्रकारन्तः रिक्तस्थलविशिष्टं सत् २ $^{1/2}$ पाददूरे निर्मितः। वरदराजस्वामिनः नित्यं पूजाभावेऽपि उदये मध्याह्ने सायं समये प्रत्येक निवेदनानि समर्प्यन्ते। वर्षे वर्षे वरदराजस्वामि जयन्ति दिने अस्य अभिषेक दिपूजानैवेद्यानि महोन्नततया समर्प्यन्ते। तिरुमल श्रीनिवास सन्निधौ अयं कश्चिवरदः कदा प्रतिष्ठितः इति इदमित्थं वक्तुं न शक्यते। भक्ताः कश्चिवरदराज स्वामिनेऽपि जय ध्वनैः साकं अभिवन्दनानि समर्पयन्तु।

चित्रकथा

# बालगोपाललीला


तेलुगु मूलम् - श्रीमती जे.पद्मनीप्रियदर्शनी
चित्राणि - श्री के. द्वारकानाथः
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०







अन्तः प्रच्छन्नपापानां शास्ता वैवस्वतो यमः।


बालकृष्णः तद्वदनगुहां न प्रतिवेश परन्तु तस्य कण्ठस्थाने स्थितः।
मत्कार्यंमहमेव करिष्यामि।
मायाधारी राक्षसः, चिन्तयति ‘‘कृष्णः किमर्थं कण्ठप्रदशे तत्रैव स्थितः।’’
एतावता एव बालगोपालः स्वशरीरं वर्धयामास।
कृष्णस्य शरीरं आश्चर्यजनकतया वर्धमानमासीत्।
अजगरराक्षस कण्ठः कृष्णेन पुरितः आसीत् अजगर राक्षसस्य उच्छ्वासनिश्शवासौ स्थगितौ।
सः तदा किं मम भवतीति भावयामास।
अजगरसर्पः उच्छासविश्शवासरहितः स्वशिरसा भुवं ताडयति।
बाधातः अहं विमुक्तो भवेयं व नवा?
किञ्चित्कालानन्तरं तस्य शिरः खण्डशः कृतः कृष्णेन।
गोपालैः सह कृष्णः बहिरागतः।
सर्वं बालकृष्णस्य भगवतः दिव्य स्पर्शमहिम्ना अजगरात् कान्तिरागत्य कृष्णे एव लीनं बभूव।
अघः शापवशात् राक्षससर्परूपं प्राप्तः। कृष्णदेवप्रवेशात् मुक्तिरूपाभयमवाप।
स्वामिन् धन्योऽहं भवद्दर्शनं प्राप्तम्।
नीति - दैवमहिम्ना सर्वाण्यपि पापानि नश्यन्ति।
लोकास्समस्ताः सुखिनो भवन्तु।



# बालविनोदिनी

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?



अस्य चित्रपटस्य रञ्जनं कुर्मः वा?



कं मार्गं अनुसृत्य बालिका योगाध्यापकं प्राप्स्यति।






बालकैः कानि भारतीयसङ्गीतसाधनानि कानि पाश्चात्यसङ्गीतसाधनानि इति ज्ञेयम् ।



अकीर्तिरिवनरको नान्योऽस्ति नरको दिवि।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



30.04.2025 तिथौ विशाखपट्टनसिंहाचल श्रीवराह लक्ष्मीनरसिंहस्वामिने अक्षयतृतीया दिने निर्वाहितचन्दनोत्सवे ति.ति.देवस्थानपक्षतः ति.ति.देवस्थान धर्मकर्तुमण्डल्यध्यक्षैः श्री बि.आर्.नायुडुमहोदयैः समर्प्यमानपीताम्बर दृश्यम्।



06.04.2025 तिथौ तेलङ्गाणाराष्ट्रे भद्राचले श्रीरामनवमी सन्दर्भं पुरस्कृत्य श्री सीतारामकल्याणाय ति.ति.देवस्थानपक्षतः ति.ति. देवस्थान धर्मकर्तमण्डल्यध्यक्षैः श्री बि.आर्. नायुडुमहोदयैः पीताम्बरसमर्पण दृश्यम्।



23.04.2025 तिथौ दातृभिः पेन्नसिमेन्टू अधिनेतृभिः श्रीप्रतापरेड्डि महोदयैः वज्रखचित स्वर्णकिरीटानि ओंटिमिट्टश्रीकोदण्डरामस्वामिने अलङ्कर्तुं ति.ति.देवस्थान धर्मकर्तुमण्डल्यध्यक्षेभ्यः, कार्यनिर्वहणाधिकारिण्यः श्री जे.श्यामलारावु ऐ.ए.यस्., महोदयेभ्यः समर्प्यमान दृश्यम्।



06.04.2025 तिथौ तिरुमल श्रीवेङ्कटेशस्वामि दर्शनानन्तरं ति.ति. देवस्थानवार्षिक कालनिर्णयपट्टिकां (क्यालण्डर्) ति.ति. देवस्थानकार्यनिर्वहणाधिकारिभिः श्री जे.श्यामलारावु ऐ.ए.यस्.,। अपि च ति.ति.देवस्थान अनुबन्धकार्यनिर्वहणाधिकारिभिः श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्., महोदयैः अत्युन्नतन्यायन्यायाधिकारिभ्यः जस्टिस् सञ्जीव्खन्नामहोदयेभ्यः समर्प्यमान दृश्यम्।



19.04.2025 तिथौ तिरुमल प्रथमघाट्मार्गे अन्तिमसोपानपंक्तौ स्वच्छान्ध्रतिरुमल भागत्वेन ति.ति. देवस्थानोद्योगिभिः स्वच्छान्ध्रप्रतिज्ञां कारयन्तः ति.ति. देवस्थानुबन्ध कार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.ए.यस्., महोदयाः।



20.04.2025 तिथौ ति.ति.देवस्थानधर्मकर्तुमण्डल्यध्यक्षैः तिरुमल मातृश्रीतरिगोण्डवेङ्गमाम्बायाः अन्नप्रसादकेन्द्र भक्तेभ्यः अन्नप्रसादसमर्पण दृश्यम्



SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-05-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.
अप्पलायगुण्ट
श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
07.06.2025 तः 15.06.2025 पर्यन्तम्